## मायायामण्। (१२४/३४७०)

असुरशब्दात् षष्ठीसमर्थात् मायायां [1]स्वविशेषे अण् प्रत्ययो भवति। [2]पूर्वस्य यतोऽपवादः। 'आसुरी माया स्वधया कृतासि' (वा.सं. ११.६९)

## तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः। (१२५/३४७१)

तद्वान् इति निर्देशादेव समर्थविभक्तिः[3]। मतुबन्तात् [4]प्रातिपदिकात् प्रथमासमर्थादासाम् इति षष्ठ्यर्थे यत् प्रत्ययो भवति, यत् [5]प्रथमासमर्थमुपधानो मन्त्रश्चेत् स भवति, यत् तदासामिति निर्दिष्टमिष्टकाश्चेत् ता भवन्ति। लुक् च मतोः इति प्रकृतिनिर्ह्रासः। इतिकरणस्ततश्चेद् विवक्षा। तद्वान् इत्यवयवेन समुदायो [6]व्यपदिश्यते। वर्चःशब्दो यस्मिन् मन्त्रेऽस्ति स वर्चस्वान्। उपधीयते येन स उपधानः। [7]चयनवचनः इत्यर्थः। वर्चस्वानुपधानमन्त्रः आसाम् इष्टकानाम् इति विगृह्य यति विहिते [8]मतोर्लुकि कृते, वर्चस्या (तै.ब्रा. १.८.९.१) [9]उपदधाति, तेजस्या (तै.ब्रा. १.८.९.१) उपदधाति। 'पयस्याः' (तै.सं २.३.१३.१)। 'रेतस्याः' (ष.विं. २१)। तद्वान् इति किम्? मन्त्रसमुदायादेव मा भूत्। उपधानः इति किम्? वर्चस्वान् [10]उपस्थानमन्त्रः आसाम् इत्यत्र मा भूत्। मन्त्रः इति किम्? अङ्गुलिमानुपधानो हस्तः आसाम् इत्यत्र मा भूत्। इष्टकासु इति किम्? [11]अङ्गुलिमानुपधानो हस्त आसाम् इत्यत्र मा भूत्। इतिकरणो नियमार्थः। [12]अनेकपदसम्भवेऽपि केनचिदेव पदेन तद्वान् [13]मन्त्रो गृह्यते, न सर्वेण॥

## अश्विमानण्। (१२६/३४७२)

अश्विशब्दो यस्मिन् मन्त्रेऽस्ति सोऽश्विमान्। अश्विमच्छब्दादण् प्रत्ययो भवति। [14]पूर्वस्य यतोऽपवादः। अश्विमानुपधानो मन्त्रः आसामि[15]ष्टकानाम् इति [16]विगृह्याण् [17]विधीयते, तत्र मतुपो लुकि कृते 'इनण्यनपत्ये' (६.४.१६४/१२४५) इति प्रकृतिभावः। 'आश्विनीरुपदधाति' (श.ब्रा. ८.२.१.११)॥

## वयस्यासु मूर्ध्नो मतुप्। (१२७/३४७३)

वयस्वानुपधानो मन्त्रो [18]यासां ता वयस्याः, तास्वभिधेयासु मूर्ध्नो मतुप् प्रत्ययो भवति। [19]पूर्वस्य यतोऽपवादः। यस्मिन् मन्त्रे वयःशब्दो[20] मूर्धन्शब्दश्च विद्यते स वयस्वानपि भवति [21]मूर्धन्वानपि, यथा 'मूर्धा वयः प्रजापतिश्छन्दः' (वा.सं. १४ ९) इति। तत्र वयस्वच्छब्दादिव मूर्धन्वच्छब्दादपि यति प्राप्ते मतुप् विधास्यते। 'मूर्धन्वतीर्भवन्ति' (तै.सं. ५.३.८.३)। [22]वयस्या एव मूर्धन्वत्यः। वयस्यासु इति किम्? यत्र मूर्धन्शब्द एव केवलो न वयःशब्दस्तत्र मा भूत्। मूर्धन्वतः इति वक्तव्ये मूर्ध्नः इत्युक्तं, मतुपो लुकं भाविनं [23]चित्ते कृत्वा॥

---

1. विषये ह. 2. पूर्वस्य नास्ति फ. 3. आसामिति प्रत्ययार्थः इत्यधिकम् क. 4. प्रातिपदिकात् नास्ति ब. क. इ. 5. तत् इत्यधिकम् ब.क. 6. निर्दिश्यते फ. 7. चयनः रचनः ड.ज. 8. मतुल्लुकि क. 9. उपधातव्या फ. 10. उपधान फ. 11. वर्चस्वान् उपधानमन्त्रः एषांकपालानामित्यत्र माभूत् ब.क.इ.ई.ह. 12. अनेकसम्भवे इ. 13. मन्त्रो नास्ति फ. 14. पूर्वस्य नास्ति फ. 15. इष्टकानाम् नास्ति फ.ई. 16. अणि कृते मतुब्लुकि च क. इ. 17. क्रियते ई.ह. 18. आसाम् फ. 19. प्रकृतिसम्बन्धिनो लुक् च इत्यधिकम् ब. 20. अस्ति इत्यधिकम् फ. ज. 21. तथा इत्यधिकम् फ. 22. वयस्याश्च फ, वयस्याश्च ताः क. 23. चेतसि ह.